क्षीणां विद्वान् सर्वोत्खातान् नवरत्नमिदं क्रमात् ॥
मित्रं स्वच्छतया रिपुं नयबलैर्लुब्धं धनैरीश्वरं कार्य्येण द्विजमादरेण युवतीं प्रेम्णा समैर्बान्धवान् ।
अत्युग्रं स्तुतिभिर्गुरुं प्रणतिभिर्मूर्खं कथाभिर्बुधं विद्याभी रसिकं रसेन सकलं शीलेन कुर्य्याद्वशम् ॥ १ ॥
कर्णौ लाघवमुच्छ्रितो निपतनं कामातुरो लाञ्छनं
लुब्धोऽकीर्त्तिमसङ्गरः परिभवं दुष्टोऽन्यदोषे रतिम् ।
निःस्वो बन्धनसुन्मना विकलतां शोकाकुलः संशयं
दुर्व्यसनप्रियतां दुरोदरवशः प्राप्नोति कष्टं मुहुः ॥ २ ॥
नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृतिर्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम् ।
लावण्यं वपुषः स्मृतिः सुमनसां शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम् ॥ ३ ॥
धर्म्मः प्रागेव चिन्त्यः सचिवमतिगतिर्भावनीया सदैव
ज्ञेयं लोकानुवृत्तं वरचरनयनैर्मण्डलं वीक्षणीयम् ।
प्रच्छाद्यौ रागरोषौ मृदुपरुषगुणौ योजनीयौ च काले
आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः सोऽपि नापेक्षणीयः ॥ ४ ॥
कार्पण्येन यशः क्रुधा गुणचयो दम्भेन सत्यं क्षुधा
मर्य्यादा व्यसनैर्धनानि विपदा स्थैर्य्यं प्रमादैर्द्विजः ।
पैशुन्येन कुलं मदेन विनयो दुश्चेष्टया पौरुषं
दारिद्र्येण जनादरो ममतया चात्मप्रकाशो हतः ॥ ५ ॥
मूर्खो शान्ततपस्वी क्षितिपतिरलसो मत्सरी धर्म्मशीलो
दुःस्थो मानी गृहस्थः प्रभुरतिकृपणः शास्त्रविद्धर्म्महीनः ।
आज्ञाहीनो नरेन्द्रः शुचिरपि सततं यः पराशोपभोगी
वृद्धो रोगी दरिद्रः स च युवतिपतिर्धिग्विडम्बप्रकारम् ॥ ६ ॥
क्षीणां यौवनमर्थिनामनुगमो राज्ञां प्रतापः सतां
सत्यं स्वल्पधनस्य सञ्चितिरसद्वृत्तस्य वाग्डम्बरः ।
कान्तारस्य मनोरमः परिणतेर्विद्या कुलस्यैकता
एवाया धनमुन्नतेर्गुणचयः शान्तेर्विवेको बलम् ॥ ७ ॥
विद्वान् संसदि पाचिकः परवशो मानी दरिद्रो गृही
वित्ताढ्यः कृपणः सुखी परवशो वृद्धो न तीर्थाश्रितः ।
राजा दुःसचिवः प्रियः कुलभवो मूर्खः पुमान् स्त्रीजितः
वेदान्ती हतसत्क्रियः किमपरं हास्यास्पदं भूतले ॥ ८ ॥
उत्खातान् प्रतिरोपयन् कुसुमितांश्चिन्वन् शिशून् वर्द्धयन्
प्रोत्तुङ्गान् नमयन् नतान् समुदयन् विश्लेषयन् संहतान् ।
तीव्रान् कण्टकिनो बहिर्नियमयन् म्लानान् मुहुः सेचयन्
मालाकार इव प्रयोगनिपुणो राजा चिरं नन्दतु ॥ ९ ॥)

**नवरात्रं**, क्ली, (नवानां रात्रीणां समाहारः । तत् साधनत्वेनास्त्यस्येति अच् ।) आश्विनशुक्लप्रतिपदादिनवमीपर्य्यन्तनवदिनकर्त्तव्यदुर्गाव्रतविशेषः । तस्यारम्भः । देवीपुराणे डामरतन्त्रे च देवीवचः ।

"अमायुक्ता न कर्त्तव्या प्रतिपत् पूजने मम ।
मुहूर्त्तमात्रा कर्त्तव्या द्वितीयादिगुणान्विता ॥"

मार्कण्डेयदेवीपुराणयोः ।

"पूर्व्वविद्धा तु या शुक्ला भवेत् प्रतिपदाश्विनी ।
नवरात्रव्रतं तस्यां न कार्य्यं शुभमिच्छता ॥"

अत्रोपवासादिकमुक्तं हेमाद्रौ भविष्ये ।

"एवञ्च विन्ध्यवासिन्यां नवरात्रोपवासतः ।
एकभक्तेन नक्तेन तथैवायाचितेन च ॥
पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे ।
स्नातैः समुदितैर्हृष्टैर्ब्राह्मणैः क्षत्त्रियैर्नृपैः ॥
वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः ॥"

मदनरत्ने देवीपुराणेऽपि ।

"कन्यासंस्थे रवौ शक्र ! शुक्लामारभ्य नन्दिकाम् ।
अयाची ह्यथवैकाशी नक्ताशी वाथ वायुदः ॥
भूमौ शयीत चामन्त्र्य कुमारीर्भोजयेन्मुदा ।
वस्त्रालङ्कारदानैश्च सन्तोष्याः प्रतिवासरम् ॥
बलिञ्च प्रत्यहं दद्यादोदनं मांसमाषवत् ।
त्रिकालं पूजयेद्देवीं जपस्तोत्रपरायणः ॥"

स्कान्दे ।

"मासि चाश्वयुजे शुक्ले नवरात्रे विशेषतः ।
संपूज्य नवदुर्गाञ्च नक्तं कुर्य्यात् समाहितः ॥
नवरात्राभिधं कर्म्म नक्तव्रतमिदं स्मृतम् ।
तिथिवृद्धौ तिथिह्रासे नवरात्रमपार्थकम् ॥
अष्टरात्रे न दोषोऽयं नवरात्रतिथिक्षयः ॥" * ॥

तत्र पूजाविधिः । सा च जयन्तीत्यादिमन्त्रेण नवाक्षरेण वा कार्य्या । यथा । सङ्कल्पं विधाय घटं संस्थाप्य तत्र देवीमावाह्य षोड़शोपचारैः पूजयित्वा माषभक्तबलिं कुष्माण्डादिबलिं वा निवेदयेत् ॥ * ॥ ततः कुमारीपूजा । यदुक्तं हेमाद्रौ स्कान्दे ।

"एकैकां पूजयेत् कन्यामेकवृद्ध्या तथैव च ।
द्विगुणं त्रिगुणं वापि प्रत्येकं नवकन्तु वा ॥"

तथा,—

"नवभिर्लभते भूमिमैश्वर्य्यं द्विगुणेन तु ।
एकवृद्ध्या लभेत् क्षेममेकैकेन श्रियं लभेत् ॥"

अथ कुमारीनिर्णयः ।

"एकवर्षा तु या कन्या पूजार्थे तां विवर्ज्जयेत् ।
गन्धपुष्पफलादीनां प्रीतिस्तस्या न विद्यते ॥"

तेन द्विवर्षमारभ्य दशवर्षपर्य्यन्तम् । कुमारिका १ त्रिमूर्त्तिः २ कल्याणी ३ रोहिणी ४ काली ५ चण्डिका ६ शाम्भवी ७ दुर्गा ८ सुभद्रा ९ इति नवनामभिस्ताः पूजनीयाः । आसामावाहनमन्त्रः । यथा,—

"मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम् ।
नवदुर्गात्मिकां साक्षात् कन्यामावाहयाम्यहम् ॥
एवमभ्यर्च्चनं कुर्य्यात् कुमारीणां प्रयत्नतः ।
कञ्चुकैश्चैव वस्त्रैश्च गन्धपुष्पाक्षतादिभिः ॥
नानाविधैर्भक्ष्यभोज्यैर्भोजयेत् पायसादिभिः ॥"

तासां त्याज्यत्वमाह ।

"ग्रन्थिस्फुटितशीर्णाङ्गीं रक्तपूयव्रणाङ्किताम् ।
जात्यन्धां केकरां काणीं कुरूपां तनुरोमशाम् ।
सन्त्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥"

तासां जातिविशेषे फलविशेषो यथा,—

"ब्राह्मणीं सर्व्वकार्य्ये च जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥
दारुणे चान्त्यजातानां पूजयेद्विधिना नरः ॥"

अत्र वेदचण्डीपाठ उक्तः । रुद्रयामले ।

"एवं चतुर्व्वेदविदो विप्रान् सर्व्वान् प्रसादयेत् ।
तेषाञ्च वरणं कार्य्यं वेदपारायणाय वै ॥"

तथा,—

"एकोत्तराभिवृद्ध्या तु नवमीं यावदेव हि ।
चण्डीपाठं जपेच्चैव जापयेद्वा विधानतः ॥" * ॥

अत्राश्ववतोऽश्वपूजनमुक्तम् । मदनरत्ने देवीपुराणे ।

"अश्वयुक्शुक्लप्रतिपत्स्वातियोगे शुभे दिने ।
पूर्व्वमुच्चैःश्रवा नाम प्रथमं श्रियमाहरत् ॥
तस्मात् साश्वैर्नरैस्तत्र पूज्योऽसौ श्रद्धया सह ।
पूजनीयाश्च तुरगा नवमीं यावदेव हि ॥
शान्तिः स्वस्त्ययनं कार्य्यं तथा तेषां दिने दिने ।
धान्यं भल्लातकं कुष्ठं वचा सिद्धार्थकास्तथा ॥
पञ्चवर्णेन सूत्रेण ग्रन्थिन्तेषान्तु बन्धयेत् ।
वायव्यैर्वारुणैः सौरैः शाक्रैर्मैत्रैः सवैष्णवैः ॥
वैश्वदेवैस्तथाग्नेयैर्होमः कार्य्यो दिने दिने ॥"

तत्र गजपूजापि । कल्पतरौ ।

"ज्येष्ठायोगे पुरा तत्र गजाश्चाष्टौ महाबलाः ।
पृथिवीमवहन् पूर्व्वं सशैलवनकाननाम् ॥
कुमुदैरावतौ पद्मः पुष्पदन्तोऽथ वामनः ।
सुप्रतीकोऽञ्जनो नीलस्तस्मात्तांस्तत्र पूजयेत् ॥"

अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरङ्गिण्यां भविष्ये ।

"केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ॥
दर्पणञ्च तृतीयायां सिन्दूरालक्तकन्तथा ।